अथ तदुदाहरणानि ।
"शीतोदकं पयः क्षौद्रं घृतमेकैकशो द्विशः ।
त्रिशः समस्तमथवा प्राक् पीतं स्थापयेद्वयः ॥
मण्डूकपर्ण्याः स्वरसः प्रभाते
प्रयोज्य यष्टीमधुकस्य चूर्णम् ।
रसो गुडूच्यास्तु समूलपुष्प्याः
कल्कः प्रयोज्यः खलु शङ्खपुष्प्याः ॥
आयुःप्रदान्यामयनाशनानि
बलाग्निवर्णस्वरवर्द्धनानि ।
मेध्यानि चैतानि रसायनानि
मेध्या विशेषेण च शङ्खपुष्पी ॥"
मण्डूकपर्णी ब्राह्मी । बरमी इति लोके । तदलाभे मञ्जिष्ठापि ग्राह्या । तस्या अपि रसायनत्वात् ।
"माक्षिकेण तुगाक्षीर्य्या पिप्पल्या लवणेन च ।
त्रिफला सितया वापि युक्ता सिद्धं रसायनम् ॥
सिन्धूत्थशर्करासुण्ठीकणामधुगुडैः क्रमात् ।
वर्षादिष्वभया प्राश्या रसायनगुणैषिणा ॥
पुनर्नवस्यार्द्धपलं नवस्य
पिष्टं पिबेद्यः पयसार्द्धमासम् ।
मासत्रयं तत्त्रिगुणं समां वा
जीर्णोऽपि भूयः स पुनर्नवः स्यात् ॥
ये मासमेकं स्वरसं पिबन्ति
दिने दिने भृङ्गरजःसमुत्थम् ।
क्षीराशिनस्ते बलवीर्य्ययुक्ताः
समाशतं जीवनमाप्नुवन्ति ॥
शतावरी सुखलिका गुडूची
सहस्तिकर्णा सहतालमूली ।
एतानि कृत्वा समभागयुक्ता-
न्याज्येन किंवा मधुनावलिह्यात् ॥
जरारुजामृत्युवियुक्तदेहो
भवेन्नरो वीर्य्यबलादियुक्तः ।
विभाति देवप्रतिमः स नित्यं
प्रभामयो भूरिविशुद्धबुद्धिः ॥
पीताश्वगन्धा पयसार्द्धमासं
घृतेन तैलेन सुखाम्बुना वा ।
वीर्य्यस्य पुष्टिं वपुषो विधत्ते
बालस्य शस्यस्य यथाम्बुवृष्टिः ॥
अयःपलं गुग्गुलुरत्र योज्यः
पलत्रयं चौषपलानि पञ्च ।
पलानि चाष्टौ त्रिफलारजश्च
कर्षं लिहन् यात्यमरत्वमेव ॥"
लोहगुग्गुलुः ।
"न केवलं दीर्घमिहायुरश्नुते
रसायनं यो विधिवन्निषेवते ।
गतिं स देवर्षिनिषेवितां शुभां
प्रपद्यते ब्रह्म तथैव चाक्षयम् ॥"
इति रसायनाधिकारे भावप्रकाशः ॥
( तथा च ।
"लाभोपायो हि शस्तानां रसादीनां रसायनम् ।
पूर्व्वे वयसि मध्ये वा तत् प्रयोज्यं जितात्मनः ।
स्निग्धस्य स्रुतरक्तस्य विशुद्धस्य च सर्व्वथा ॥
नाविशुद्धे शरीरे हि युक्तो रासायनो विधिः ।
वाजीकरो वा मलिने वस्त्रे रङ्ग इवाफलः ॥'
"रसायनानां द्विविधं प्रयोगमृषयो विदुः ।
कुटीप्रावेशिकं मुख्यं वातातपिकमन्यथा ॥
निर्व्वाते निर्भये हर्म्ये प्राप्योपकरणे पुरे ।
दिश्युदीच्यां शुभे देशे त्रिगर्भां सूक्ष्मलोचनाम् ॥
धूमातपरजोव्यालस्त्रीमूर्खाद्यविलङ्घिताम् ।
सज्जवैद्योपकरणां सुमृष्टां कारयेत् कुटीम् ॥
अथ पुण्येऽह्नि संपूज्य पूज्यांस्तां प्रविशेच्छुचिः ।
तत्र संशोधनैः शुद्धः सुखी जातबलः पुनः ॥
ब्रह्मचारी धृतियुतः श्रद्दधानो जितेन्द्रियः ।
दानशीलदयासत्यव्रतधर्म्मपरायणः ॥
देवतानुस्मृतो युक्तो युक्तस्वप्नप्रजागरः ।
प्रियौषधः पेशलवाक् प्रारभेत रसायनम् ॥
हरीतकीमामलकं सैन्धवं नागरं वचाम् ।
हरिद्रां पिप्पलीं वेल्लं गुडेनोष्णाम्बुना पिबेत् ॥
स्निग्धः स्विन्नो नरः पूर्व्वं तेन साधु विरिच्यते ।
ततः शुद्धशरीराय कृतसंसर्ज्जनाय च ॥
त्रिरात्रं पञ्चरात्रं वा सप्ताहं वा घृतान्वितम् ।
दद्याद्यावकमाशुद्धेः पुराणशकृतोऽथ वा ॥
इत्थं संस्कृतकोष्ठस्य रसायनमुपाहरेत् ।
यस्य यद्यौगिकं पश्येत् सर्व्वमालोच्य सात्म्य-
वित् ॥"
"कुटीप्रवेशः क्षणिनां परिच्छदवतां हितः ।
अतोऽन्यथा तु ये तेषां सूर्य्यमारुतिकोविधिः ॥
वातातपसहायोगा वक्ष्यन्तेऽतो विशेषतः ।
सुखोपचारा भ्रंशेऽपि ये न देहस्य बाधकाः ॥"
इत्युत्तरस्थानीयवाग्भटे ३९ अध्याये ।
विशेषस्तु तस्मिन्नध्याये ज्ञातव्यः ॥ * ॥ रसः पारदः तद्वत्तया तज्जातीय-हरितालादिकञ्च अयनं आश्रय उपायो वा यस्य तत् । स्वर्णादिकरणम् ।
अथ रसायने ईश्वर उवाच ।
"गोमूत्रं हरितालञ्च गन्धकञ्च मनःशिलाम् ।
समं समं गृहीत्वा तु यावत् शुष्यति पेषयेत् ॥
एकादशदिनं यावत् यत्नेन रक्षयेत् शुचिः ।
मन्त्रेण धूपदीपादिनैवेद्यैर्गन्धमिश्रितैः ॥
मन्त्रस्तु ॐ हरिहराय रसायनं सिद्धिं कुरुकुरु स्वाहा । अयुतजपेन सिद्धिः ।
तद्वटीं गोलकं कृत्वा वस्त्रेणावेष्टयेत् पुनः ।
मृत्तिकां लेपयेत्तस्य छायाशुष्कन्तु कारयेत् ॥
गर्त्ते कुण्डे विनिक्षिप्य पलाशकाष्ठवह्निना ।
ज्वालयेद्दशयामन्तु नान्यथा शङ्करोदितम् ॥
तद्भस्म जायते सिद्धिर्व्विद्धि सिद्धिसमाकुलम् ।
ताम्रपात्रे अग्निमध्ये बिन्दुमात्रं नियच्छति ॥
तत्क्षणाज्जायते स्वर्णं नान्यथा शङ्करोदितम् ।
दातव्यं गुरुभक्ताय न दद्याद्दुष्टमानसे ।
सिद्धपीठे भवेत्सिद्धिर्गायत्रीलक्षजापनैः ॥
यस्मै कस्मै न दातव्यं दातव्यं शिवभक्तके ।
अग्निमुखं द्विजातीनां पापकानां विशेषतः ।
गोप्यं गोप्यं महागोप्यं देवानामपि दुर्लभम् ॥"
प्रकारान्तरम् ।
"आनीय बहुयत्नेन सबलं तोलकद्वयम् ।
वसुराद्यं शिवचाद्यं मायाबिन्दुसमन्वितम् ॥
बीजत्रयञ्चाष्टशतं प्रजपेत् कम्बलोपरि ।
अशीतितोलकमानं कृष्णधेनुसमुद्भवम् ॥
दुग्धमानीय यत्नेन चाष्टोत्तरशतं जपेत् ।
वस्त्रयुक्तेन सूत्रेण दुग्धमध्ये विनिक्षिपेत् ॥
उत्तापं ज्वालयेद्धीमान् मन्दमन्देन वह्निना ।
रिपुर्वेदार्द्धपर्य्यन्तमर्द्धशेषं भवेद्यदि ॥
तदैवोत्तोल्य तद्द्रव्यं दुग्धं तोये विनिक्षिपेत् ॥"
ततः परीक्षा कर्त्तव्या ।
"निर्धूमं पावके द्रव्यं दत्त्वा उत्थाप्य यत्नतः ।
तत्रैव प्रजपेन्मन्त्रं सर्व्वबन्धनमात्मकम् ॥
सार्द्धेन तोलकं ताम्रं दत्त्वा उत्थाप्य यत्नतः ।
गुञ्जाप्रमाणं तद्द्रव्यं सत्यं सत्यं हि शङ्करि ! ।
रौप्यं भवति तद्द्रव्यं नान्यथा शङ्करोदितम ॥"
प्रकारान्तरम् ।
"कृष्णसर्पमेकं गृहीत्वा तस्य मुखे शिववीर्य्यं पूरयित्वा सर्पस्य मुखं गुदञ्च बद्ध्वा नूतनमृत्तलयस्थालीमध्ये संस्थाप्य स्थालीमुखं मृदादिना संलिप्य निर्ज्जनस्थाने प्रातरारभ्य पुनःप्रातर्यावत् वह्निना ज्वालं दद्यात् । ततः शुभक्षणे स्थालीमुखमुद्धृत्य सर्पभस्म विहाय शिववीर्य्यं गृह्णीयात् । ततस्तोलकमितं ताम्रं गालयित्वा तस्मिन् गालितताम्रे रक्तिकमात्रं तत् शिववीर्य्यं दद्यात् तेन तत्क्षणादेव तत्ताम्रं सुवर्णीभूतम् । आदौ शिवार्च्चनं कृत्वा पश्चात् प्रयोग एव कर्त्तव्यः ॥" इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे रसायनं नाम त्रयोदशः पटलः ॥ )
रसायनः, पुं, गरुड़ः । विहङ्गः । इति मेदिनी ॥
रसायनफला, स्त्री, ( रसायनेन फलति या । फल् + अच् । टाप् । ) हरीतकी । इति त्रिकाण्डशेषः ॥
रसायनश्रेष्ठः, पुं, ( रसायनेषु श्रेष्ठः । ) पारदः । इति राजनिर्घण्टः ॥
रसायनी, स्त्री, ( रसान् तैलादीन् अयतं प्राप्नोतीति । अय् + ल्युः । ङीष् । ) गुडूची । काकमाची । महाकरञ्जः । गोरक्षदुग्धा । मांसच्छदा । इति राजनिर्घण्टः ॥ ( मञ्जिष्ठा । अस्याः पर्य्यायो यथा,—
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी च गण्डीरी मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
रसालं, क्ली, ( रसं आलातीति । आ + ला + कः । ) सिह्लकम् । बोलम् । इति मेदिनी ॥
रसालः, पुं, (रसं आलाति गृह्णाति । आ + ला + कः । ) इक्षुः । आम्रः । इत्यमरः ॥ ( यथा, साहित्यदर्पणे १०परिच्छेदे अतिशयोक्त्यलङ्कारे ।
"प्रागेव हरिणाक्षीणां चित्तमुत्कलिकाकुलम् ।
पश्चादुद्भिन्नबकुलरसालमुकुलश्रियः ॥" )
पनसः । इति शब्दरत्नावली ॥ कुन्दरुष्कम् ॥
गोधूमः । पुण्ड्रकनामेक्षुः । इति राजनिर्घण्टः ।